संस्कृतवार्ताः

03.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· ताइवानदेशे शक्तिशालिना भूकम्पेन-न्यूनातिन्यूनं सप्तजना: निहता:, सप्तशताधिकाश्च व्रणिता: सन्ति, क्षेत्रे सुनाम्याख्यस्य महौघस्य सञ्चेतना च प्रख्यापिता।

· विश्ववित्तकोशेन अनुमितं यत् वर्षेऽस्मिन् भारतस्य अर्थव्यवस्था सार्धसप्तप्रतिशतानुसारं वरीवर्धिष्यतीति ।

· जम्मूकश्मीरे लोकसभाया: प्रथमचरणीय-निर्वाचने चतुर्थ-उधमपुराख्यस्य लोकसभाक्षेत्रस्य त्रयोविंशतिसहस्रोत्तरषोडशलक्षाधिक-संख्यका: मतदातार: द्वादशप्रत्याशिनां भाग्यनिर्णयं विधास्यन्ति।

· केन्द्रीयमन्त्रिणा डॉ. एल मुरुगनेन सह अन्यैः एकादश-नूतन-राज्यसभासदस्यैः अद्य शपथग्रहणं कृतम्।

· आई-पी-एल्-इति क्रिकेट-स्पर्धा-मालिकायाम् अद्य विशाखापट्टनम् इत्यत्र वाई.एस. राजशेखर-रेड्डी इति क्रिकेट क्रीडाङ्गणे सायं सार्धसप्तवादने दिल्ली कैपिटल्स-दलं कोलकाता नाईट राईडर्स-दलं सम्मुखीकरिष्यति ।

<u>ताइवान/भूकम्प:</u>

ताइवानदेशे शक्तिशालिना भूकम्पेन-न्यूनातिन्यूनं सप्तजना: निहता:, सप्तशताधिकाश्च व्रणिता: सन्ति। ताइवान-देशस्य पूर्वक्षेत्रीयतटेषु रिक्टरपरिमितौ दशमलव-चतुरुत्तर-सप्त-तीव्रताया: भूकम्प: आगत:, तदनन्तरं क्षेत्रे सुनाम्याख्यस्य महौघस्य सञ्चेतना प्रख्यापिता।

## भारत-ताइवान-सहायता

भारत-ताइपे-सङ्घेन ताइवान-देशे भूकम्पसम्बन्धी किमपि सहायतां स्पष्टीकरणं च प्राप्तुं आपत्-साहाय्य-सङ्ख्याः प्रसारिता: सन्ति। आपत्सङ्ख्या अस्ति - शून्यं-नव-शून्यं-पञ्च-द्वे-चत्वारि-सप्त-नव-शून्यं-षड् तथा च ईमेल-संकेतो वर्तते ad.ita@mea.gov.in इति। संघेन ताइवानदेशे निवसतां भारतीयनागरिकैः आग्रहः कृतः यत् ते स्थानीयाधिकारिभिः निर्गत-परामर्शानां दिङ्निर्देशानां च अनुसरणं कुर्वन्तु इति।

## भारत/विश्ववित्तकोष:

विश्ववित्तकोशेन प्रोक्तं यत् वर्षेऽस्मिन् भारतस्य अर्थव्यवस्था सार्धसप्तप्रतिशतानुसारं वृद्धे:अनुमानं वर्तते इति। अस्मै कालाय विश्वकोषेन स्वस्य प्राक्तनीय-भविष्यवाण्यां दशमलव-द्वि-अधिकैकप्रतिशताङ्कस्य वृद्धि: संशोधितास्ति। सहैव भारतदेश: आगामी वर्षेऽपि दशमलव-एकोत्तर-षट् प्रतिशताङ्केन वृद्धिम् गमिष्यतीति अनुमानमस्ति।

## जम्मू कश्मीर-उधमपुरनिर्वाचनक्षेत्रम्

जम्मूकश्मीरे अस्यैव मासस्य एकोनविंशे दिनाङ्के सम्पद्यमाने लोकसभाया: प्रथमचरणीय-निर्वाचने चतुर्थ-उधमपुराख्यस्य लोकसभाक्षेत्रस्य त्रयोविंशतिसहस्रोत्तरषोडशलक्षाधिक-संख्यका: मतदातार: द्वादशप्रत्याशिनां भाग्यनिर्णयं विधास्यन्ति। आकाशवाण्या: जम्मूक्षेत्रस्य वार्ताहरेण प्रोक्तं यत् संसदीयक्षेत्रमिदम् किश्तवाड़, डोडा, रामबन, उधमपुर सहित-कठुआन्तं यावत् विवृतमस्ति, क्षेत्रेऽस्मिन् सपादषोडशलक्षप्राय: जना: पंजीकृता: सन्ति, येषु सार्ध-अष्टलक्षप्राय: पुरुषा:, पादोन-अष्टलक्षाधिकाश्च महिला: सन्ति। त्रयोदशमतदातारस्तु किन्नरा: अपि सन्ति। भारतनिर्वाचनायोगेन क्षेत्रेऽस्मिन् मतदानाय सप्तत्रिंशदधिक-षड्विंशतिशत-मतदानकेन्द्राणि विनिर्मितानि सन्ति।

## राज्यसभा/ शपथ ग्रहणम् :

केन्द्रीयमन्त्रिणा डॉ. एल मुरुगनेन सह अन्यैः एकादश राज्यसभासदस्यैः अद्य शपथं ग्रहणं कृतम्। उपराष्ट्रपतिना राज्यसभाध्यक्षेण च जगदीपधनखडेन संसदभवने स्वकक्षे शपथ-ग्रहणं कारितम्। एतेषु सदस्येषु बिहारतः प्रो मनोज झा, धर्मशिला गुप्ता, संजय यादवः,

हिमाचलप्रदेशात् हर्षमहाजनः, हरियाणातः सुभाषचन्द्रः, महाराष्ट्रतः मेधा कुलकर्णी, चन्द्रकान्त हण्डौरः, कर्नाटकतः जी सी चन्द्रशेखरः, गुजराततः गोविन्दभाई ढोलकिया, उत्तरप्रदेशतः साधनासिंहः, मध्यप्रदेशतः अशोक सिंह: च सम्मिलिताः सन्ति। पूर्वप्रधान मन्त्रिणा डॉ. मनमोहनसिंहेन सह राज्यसभायाः षट्पञ्चाशत् सदस्याः अस्मिन् सप्ताहे उच्चसदनात् सेवानिवृत्ताः जाताः।

नैर्वाचानिक-सम्मर्द:/राजनाथसिं:

वरिष्ठ-भाजपा-दल-नेत्रा केन्द्रीयमन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे अस्मद्देश: विश्वस्य पञ्चसु आर्थिकदृष्ट्या श्रेष्ठतमेषु देशेषु एक: समजायत, तेन अग्रे उक्तं यत् सप्तविंशत्यधिक द्विसहस्रतमवर्षं यावत् आर्थिकदृष्ट्या समृद्धेषु त्रिषु देशेषु एक: भारतदेश: भवेदिति क्षमतापि वर्तते। तेनोक्तं यत् भाजपेतिदलं भारतम् उन्नतिं प्रति नयनाय प्रतिबद्धधमस्तीति। तेन एतदपि प्रोक्तं यत् विगत-नववर्षेषु देशस्य पञ्चविंशति-कोटिजना: निर्धनताया: निकषिता: सन्तीति। स: गाजियाबादक्षेत्रे भाषमाण: आसीत्। एतन्मध्ये गौतमबुद्धनगरक्षेत्रत: महेशशर्मणा नामांकनमपि पूरितम्।

केरल:नामाङ्कनम्

कांग्रेसदलनेत्रा राहुलगांधिना अद्य मध्याह्ने केरलस्य वायनाड लोकसभाक्षेत्रे निर्वाचनाधिकरिण: सम्मुखं नामाङ्कनपत्रं पूरितम्। तेन कलपेट्टा नगरे एकस्य नैर्वाचनिकसम्मर्दयुतस्य पथसंचलनस्यापि नेतृत्वं कृतम्। यत्र सहस्रश: समर्थका: तस्य सघोषं स्वागतं कृतवन्त:। अवसरेऽस्मिन् दलस्य महासचिव: प्रियंकागांधी, केसी वेणुगोपाल: अन्ये च राज्यस्य दलनेतार: आसन्।

उपराज्यपालस्योपवेनम् (जम्मूकश्मीर)

जम्मूकश्मीरे उपराज्यपालेन मनोज-सिन्हा इत्यनेन आगामीनां नवरात्र-वैशाखी-ईदादि-पर्वाणाम् आयोजन-सन्नद्धतां ध्यात्वा ह्य: राज्यस्य सम्बन्धित-विभागप्रमुख- अधिकारीणाम् उच्चस्तरीयोप-वेशनं समाकलितम्। राज्यपालेन च राज्यस्य आरक्षि-अधिकारिण: निर्दिष्टा: यत् ते विभिन्नानां धार्मिकस्थलानां पर्यवेक्षणं कृत्वा सुरक्षासम्बन्धिता: सन्नद्धता: सुनिश्चयेयुरिति।

पुस्तकानि:एन सी ई आर टी

राष्ट्रिय-शैक्षिक-अनुसंधान-अथ-प्रशिक्षण-परिषदा प्रोक्तं यत् एन.सी.ई.आर.टी. इति संस्था छात्रेभ्य: विद्यालयीय-पाठ्यपुस्तकानां समयेन उपलब्धताम् आलक्ष्य यथासंभव प्रयासं कुरुते इति। सन्देशे प्रोक्तं यत् प्रथम-द्वितीय-सप्तम-अष्टम-दशम-द्वादशकक्षाणां- त्रयस्त्रिंशल्लक्षसंख्याकानि पुस्तकानि मुद्रितानीति, पुस्तकानि च विपण्यान्तं यावत् प्रापितान्यपि। एन.सी.ई.आर.टी. इति संस्थया अग्रे प्रोक्तं यत् तृतीयषट्कक्षयो: पुस्तकानि अस्य मासस्य अन्ते, मई-मासे च प्रकाशयिष्यन्ते। चतुर्थपञ्चमनवमैकादश- कक्षाणां पुस्तकानि अप्रैलमासान्तं यावत् आपणेषु उपलब्धानि भविष्यन्तीति। संस्थया अभिभावका: आश्वासिता: यत् ते चिन्तामुक्ता: भवन्त्विति। संस्थाया: सन्देशोऽयं विद्यालयीय-पुस्तकानाम् अनुपलब्धता-सम्बन्धितां अपुष्टसूचनाम् आलक्ष्य आसीत्।

आई. एम. डी.

भारत-ऋतु-विज्ञान-विभागेन आई.एम.डी. इत्यनेन अनुमानितं यत् अस्य मासस्य षड्-दिनांकं यावत् कर्नाटक, ओडिशा, पश्चिमबंगाल, झारखण्ड, आन्ध्रप्रदेश, पुडुच्चेरी राज्याणां केषुचित् भागेषु ताप-तरङ्गस्य स्थिति: भविष्यति। ऋतु-विभागेन तेलंगाना कर्नाटकराज्ययो: आगामि त्रिदिवसावधौ तटीय कर्नाटक, केरल, तमिलनाडु, पुडुच्चेरी, तटीय आन्ध्रप्रदेशे च पञ्चदिवसावधौ उष्णं-आर्द्रतापूर्ण-ऋतो: सूचना ख्यापिता अस्ति। ऋतुविभागेन उक्तं यत् आगामि त्रिदिवसावधौ उत्तर-पश्चिम, मध्य-पूर्व भारते अधिकतम-तापमानं द्वित: त्रीणि डिग्री सेल्सियस् यावत् सम्बर्धिष्यति।

आई-पी-एल्

आई-पी-एल्-इति क्रिकेट-स्पर्धा-मालिकायाम् अद्य विशाखापट्टनम् इत्यत्र वाई.एस. राजशेखर-रेड्डी इति क्रिकेट क्रीडाङ्गणे सायं सार्धसप्तवादने दिल्ली कैपिटल्स-दलं कोलकाता नाईट राईडर्स-दलं सम्मुखीकरिष्यति । ह्यः रात्रौ बैग्लूरूस्थे एम. चिन्नास्वामी क्रीडाङ्गणे लखनऊ सुपर जाइन्ट्स दलेन रॉयल चैलेंजर्स बैग्लूरू-दलं अष्टविंशति: धावनांकै: पराजितम् ।

।। इति वार्ता: ।।